सुते जाते तथा यस्यां षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्दनी षष्ठी ज्यैष्ठे चारण्यसंज्ञिता ।
आषाढ़े कर्द्दमी ज्ञेया श्रावणे लुण्ठनी मता ॥
भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजे तथा ।
नाड़ाख्या कार्त्तिके मासि मार्गे मूलकरूपिणी ॥
पौषे मास्यन्नरूपा च शीतला तपसि स्मृता ।
गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता" ॥
इति स्कन्दपुराणम् ॥

अशोका, स्त्री, (न विद्यते शोको दुःखं यस्याम् ।) कटुकी । इत्यमरः । अर्हतां शासनदेवताभेदः । इति हेमचन्द्रः ॥

अशोकारिः, पुं, (अशोकस्य अरिः । कदम्बवृक्षः । इति शब्दचन्द्रिका ॥

अशोकाष्टमी, स्त्री, (न विद्यते शोको यस्यां सा । एवम्भूता अष्टमी ।) चैत्रमासीयशुक्लाष्टमी । तत्राष्टसङ्ख्याशोककलिकायुक्तजलपानं कर्त्तव्यम् । यथा, अथाशोकाष्टमी स्कान्दे ।
"मीने मधौ शुक्लपक्षे अशोकाख्यां तथाष्टमीं ।
पिबेदशोककलिकाः स्नायाल्लौहित्यवारिणि" ॥
अशोकाख्येत्युपादानात्तिथिमात्रेऽपि तत्पानं । फलन्तु मन्त्रलिङ्गात् शोकराहित्यमवगन्तव्यं । लौहित्यवारिणि ब्रह्मपुत्राख्यनदजले । पुनर्वसुयोगे तु फलाधिक्यं । आह लिङ्गगरुड़पुराणयोः ।
"अशोककलिकाश्चाष्टौ ये पिबन्ति पुनर्वसौ ।
चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः" ॥
पानमन्त्रस्तु ।
"त्वामशोक हराभीष्ट मधुमाससमुद्भव ।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु" ॥
स्त्रीशूद्रकर्त्तृकपानेऽपि प्रागुक्तयुक्तेः स्वयं मन्त्रः पठनीयः । स्त्रीपक्षे ऊहोऽपि नास्ति विस्तृतमेकादशीतत्त्वे । अशोकपानन्तु पञ्चमार्द्धप्रहरव्यापिन्यामष्टम्यां भ्रातृद्वितीयोक्तवत् । इति तिथ्यादितत्त्वं ॥ * ॥ अपि च । अत्र स्रोतोजले बुधवारे पुनर्व्वसुनक्षत्रयुक्तशुक्लाष्टम्यां वाजपेयशतजन्यफलसमफलप्राप्तिकामः स्नायात् । ब्रह्मपुत्रे तु सर्व्वपापक्षयपूर्व्वकतीर्थस्नानजन्यफलप्राप्तिकामः स्नायात् । स्नानेतिकर्त्तव्यतां विधाय ।
"ॐ, ब्रह्मपुत्र महाभाग शान्तनोः कुलनन्दन ।
अमोघागर्भसंभूत पापं लौहित्य मे हर" ॥
इति पठित्वा स्नायात् ।
केवलशुक्लाष्टम्यां ब्रह्मपदगमनफलं । पञ्चमार्द्धप्रहरव्यापिन्यां पुनर्व्वसुयुक्तायां केवलायां वा शुक्लाष्टम्यां शोकरहितत्वकामः अष्टावशोककलिका अहं पिबामि इति सङ्कल्प्य,—
"त्वामशोक हराभीष्ट मधुमाससमुद्भव ।
पिबामि शोकसन्तप्तो मामशोकं सदा कुरु" ॥
इति पठित्वा विष्णुपदजलमिश्रिता अशोककलिका अष्टौ पिबेत् । स्त्रीशूद्रानुपनीतैरपि मन्त्रः पठनीयः पौराणिकत्वात् । स्त्रीपक्षे लिङ्गोहो नास्ति प्रकृतेः समवेतार्थत्वात् । इति कृत्यतत्त्वं ॥

अशोचः, पुं, (न शोचः । नञ्समासः ।) शोकाभावः । तत्पर्य्यायः । अनर्हतिः । इति त्रिकाण्डशेषः ॥

अशोच्यं, त्रि, (शुच् + कर्म्मणि ण्यत् । ततो नञ्तत्पुरुषः ।) शोकायोग्यं । अशोचनीयं । यथा,—
"अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे ।
गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः" ॥
इति श्रीभगवद्गीतायां २ अध्याये ११ श्लोकः ॥
(तथा च चाणक्ये,—
"अशोच्यो निर्धनः प्राज्ञोऽशोच्यः पण्डितबान्धवः ।
अशोच्या विधवा नारी पुत्त्रपौत्त्रप्रतिष्ठिता")

अशौचं, क्ली, (शुचेः पवित्रताया भावः शौचं ततो नञ्तत्पुरुषः) शुचित्वाभावः । स्मृतौ तु । वैदिककर्म्मानर्हत्वप्रयोजकीभूतसंस्कारविशेषः । यथा । वैदिककर्म्मानर्हत्वप्रयोजकसंस्कारविशेषरूपमशौचं । वैदिककर्म्मार्हत्वप्रयोजकसंस्काररूपं शौचं । न चाशौचाभाव एव शुद्धिर्नसंस्कारविशेष इति वाच्यं । अघानां यौगपद्येऽत्विति न वर्द्धयेदघानि इत्येताभ्यामशौचे पापपर्य्यायाघपदप्रदर्शनात् अशौचपदस्य यथाभावरूपत्वं । तथा,—
"देवाश्च पितरश्चैव पुत्त्रे जाते द्विजन्मनां ।
आयान्ति तस्मात्तदहः पुण्यं मङ्गल्य सर्व्वदा" ॥
इत्यादित्यपुराणीयेन शौचे पुण्यपददर्शनात् शौचस्यापि भावरूपता प्रतीयते । इति शुद्धितत्त्वं ॥ * ॥ मन्त्रदगुरुमरणे अशौचं यथा,—
"गृहीतो देवतामन्त्रः सावित्रीग्रहणं कृतं ।
यस्मात्तस्य त्रिरात्रन्तु ब्रह्मविद्याग्रहो यतः ॥
उपनीयाध्यापको यस्तस्मिन्नपि त्रिरात्रकं ।
वेदवेदाङ्गशास्त्राणां व्याख्यानं शिक्षितं यतः ॥
ज्ञानं प्रतिष्ठितं येन वेदाभ्यासो यतः कृतः ।
तस्मिन्मृते चैकरात्रं गुरौ शिष्ये तथैव च ॥"
इति मत्स्यसूक्ते महातन्त्रे ३५ पटलः ॥ अपि च ।
"गुरावुपरते चैव ग्रहाणि शिष्यसन्ततौ" ।
इति विज्ञानतन्त्रं ॥ * ॥ अन्यत् पूर्व्वलिखितं । विहितकर्म्मविरोध्यदृष्टविशेषः । तदनेकविधं तत्र शुद्धितत्त्वोक्ताशौचानि सगृह्यन्ते ॥

अथ सपिण्डाद्यशौचं १ ॥

जनने मरणे च सप्तमपुरुषपर्य्यन्तं सम्पूर्णाशौचं । तत्र विप्रस्य दशाहः क्षत्त्रियस्य द्वादशाहः । वैश्यस्य पञ्चदशाहः । शूद्रस्य मासः ॥ (यथाह मनुः ।
"शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति" ॥)
जनने मरणे च दशमपुरुषपर्य्यन्तं सर्व्वेषां वर्णानां त्र्यहः । चतुर्द्दशपुरुषपर्य्यन्तं पक्षिणी ॥
जनने मरणे च जन्मनामस्मृतिपर्य्यन्तं सर्व्ववर्णानामेकाहः ॥ जन्मनामस्मृतेरभावे स्नानमात्रं ॥
अशौचं प्रति कन्यायास्त्रिपुरुषं सापिण्ड्यं ॥ मातामहमरणे सर्व्वेषां वर्णानां त्रिरात्रं ॥
मातृष्वस्रीय-पितृष्वस्रीय-मातुलपुत्त्र-भागिनेयमरणे सर्व्ववर्णानां पक्षिणी ॥
पितामहभगिनीपुत्त्र--पितामहीभगिनीपुत्त्र--पितामहीभ्रातृपुत्त्ररूप-पितृबान्धवत्रयमरणे सर्व्ववर्णानां पक्षिणी ॥
मातामहभगिनीपुत्त्र-मातामहीभगिनीपुत्त्र-मातामहीभ्रातृपुत्त्ररूप-मातृबान्धवत्रयमरणे सर्व्ववर्णानामहोरात्रं ॥
एकग्रामवासिसगोत्रजमरणे सर्व्ववर्णानामहोरात्रं ॥
औरसव्यतिरिक्तपुत्त्रजननमरणयोः परपूर्व्वभार्य्याप्रसवमरणयोश्च सर्व्ववर्णानां त्रिरात्रं ॥
आचार्य्यमरणे ब्राह्मणादिवर्णत्रयाणां त्रिरात्रं ॥
समानजातीयोत्कृष्टजातीयपुरुषान्तर-संगृहीतस्वभार्य्यामरणे सर्व्वेषां त्रिरात्रं ॥ हीनवर्णोपभुक्तामरणे तु नाशौचं ॥
भगिनीपुत्त्रस्थले मातृष्वसुर्भ्रातृपुत्त्रस्थले पितृष्वसुः पैतृष्वस्रीयस्थले मातुलपुत्त्रस्य जामातृस्थले श्वश्रूश्वशुरयोर्म्मरणे भगिनीपुत्त्रादिचतुर्णां त्रिरात्रं ॥
श्वश्रूश्वशुरयोः सन्निधिमरणे सर्व्ववर्णानां त्रिरात्रं ॥ श्वश्रूश्वशुरयोरेकग्रामस्थितयोर्म्मरणे सर्व्वेषां पक्षिणी ॥
श्वश्रूश्वशुरयोर्भिन्नग्राममरणे सर्व्वेषामहोरात्रं ॥
भगिनी-मातुलानी-मातुल-पितृष्वसृ-मातृष्वसृ-गुर्व्वङ्गना-मातामही-मरणे सर्व्वेषां पक्षिणी ॥
आचार्य्यपत्नीपुत्त्रयोरुपाध्यायस्य मातृवंशमात्रेयस्य श्यालकस्य सहाध्यायिनः शिष्यस्य च मरणे सर्व्ववर्णानामहोरात्रं ॥ मातृष्वसृपुत्त्र-पितृष्वसृपुत्त्र-मातुलपुत्त्ररूपात्मबान्धवत्रयमरणे सर्व्ववर्णानां पक्षिणी ॥
(तथा च मनुः—
"मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च" ।
प्रथममन्येनोढ़ा तेनैव जनितपुत्त्रा पुत्त्रसहितैवान्यमाश्रिता पश्चात्तेनापि जनितपुत्त्रा तयोः पुत्त्रयोर्यथासम्भवं प्रसवमरणयोर्द्वितीयपुत्त्रपितुस्त्रिरात्रं । तत्पिण्डदानामेकरात्रं । तद्द्वितीयपितुर्म्मरणे तथाविधपुत्त्रयोरपि त्रिरात्रं । तथाविधपुत्त्रयोः परस्परप्रसवमरणयोर्म्मातृजातुल्याशौचं ॥
दौहित्रमरणे सर्व्वेषां वर्णानां पक्षिणी ॥
पितृमातृमरणे ऊढ़ानां कन्यानां त्रिरात्रं ॥ यदि मातुलमातृष्वसृपितृष्वसृप्रभृतीनां दत्तकत्वं करोति तदा सर्व्वेषां वर्णानां त्रिरात्रं ॥
मातामहादीनां त्रिरात्राभ्यन्तरं मरणश्रवणे तच्छेषेण शुद्धिः । तत्कालोत्तरश्रवणे तु नाशौचं । किन्त्वाचारात् स्नानमात्रं ॥

अथ बालाद्यशौचं ॥ २

नवमादिमासजातबालस्याशौचकालाभ्यन्तरे मरणे मातापित्रोरस्पृश्यत्वं युक्तं तदेव सजातकजननाशौचं ॥ जातीनान्त्वशौचं नास्ति ॥
नवमादिमासंमृतजातयोः कन्यापुत्त्रयोः पित्रादिसपिण्डानां मातुश्च जननाशौचं ॥ तत्र ब्राह्मणानां दशाहं शूद्राणां मासः ॥ पुत्त्रजन्मनि पितुः सचेलं स्नानं । पुत्त्रमुखदर्शनात्परं पुनः सचेलस्नानं ॥
(तथाच संवर्त्तः,—
"जाते पुत्त्रे पितुः स्नानं सचेलं तु विधीयते ।